(ऋ. १.३.५) [1]इति । साह्वान् इति 'षह मर्षणे' (धा. पा. ८५३) [2]इत्येतस्य [3]परस्मैपदम्, उपधादीर्घत्वम्, [4]अद्विर्वचनम् अनिट्त्वं च निपातनात् । साह्वान् बलाहकः । मीढ्वान् इति 'मिह सेचने' (धा. पा. ९९३) इत्येतस्य अद्विर्वचनम्, अनिट्त्वम्, [5]उपधादीर्घत्वं ढत्वं च [6]निपातनात् । 'मीढ्वस्तोकाय तनयाय [7]मृळ' (ऋ. २.३३.१४) । एकवचनमतन्त्रम् ।

[६५७] कृञादीनां के द्वे भवत इति वक्तव्यम् । (म.भा. ३.१७)

[8]क्रियतेऽनेन इति चक्रम् । चिक्लिदम् । कृञः क्लिदेश्च 'घञर्थे कविधानम्' (वा. ३०६) इति कः प्रत्ययः ।

[६५८] चरिचलिपतिवदीनां [9]द्वित्वमच्याक् चाभ्यासस्य । (म.भा. ३.१७)

चरादीनां धातूनाम्[10]अपि प्रत्यये परतः द्वे भवतः । अभ्यासस्य आगागमो भवति । [11]आगागमविधान-सामर्थ्याच्च च हलादिशेषो न भवति[12] । हलादिशेषे हि सत्यागमस्यादेशस्य च विशेषो नास्ति । चराचरः । चलाचल । पतापतः । [13]वदावदः ।

[६५९] वेति वक्तव्यम् ।

तेन चरः पुरुषः, चलो रथः, पतं [14]यानम्, वदो [15]मनुष्यः इत्येवमादि [16]सिद्धं भवति ।

[६६०] हन्तेर्घत्वं च । (म.भा. ३.१७)

हन्तेरचि प्रत्यये परतो द्वे भवतः, अभ्यासस्य च [17]हकारस्य च घत्वम्, आक् चागमो भवति । परस्य 'अभ्यासाच्च' (७.३.५५/२४३०) इति कुत्वम् । 'घनाघनः क्षोभणश्चर्षणीनाम्' (ऋ. १०.१०३.१) ।

[६६१] पाटेर्णिलुक् चोक् च [18]दीर्घश्चाभ्यासस्य । (म.भा. ३.१७)

पाटेरचि [19]परतो द्वे भवतो णिलुक् च भवति । अभ्यासस्य च ऊगागमो दीर्घश्च भवति । [20]पाटूपटः ॥

## ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे । (१३/१००३)

पुत्र पति इत्येतयोरुत्तरपदयोस्तत्पुरुषे समासे ष्यङः संप्रसारणं भवति । यणः स्थाने इग् भवति इत्यर्थः । [21]कारीषगन्धीपुत्रः । कारीषगन्धीपति । कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । करीषस्येव गन्धोऽस्य, कुमुदस्येव गन्धोऽस्य [22]इति बहुव्रीहिः, तत्र 'उपमानाच्च' (५.४.१३७/८७६) इति [23]गन्धस्येदन्तादेशः । करीषगन्धेः अपत्यम् इत्यण् (४.१.९२/१०८८), तदन्तात् स्त्रियाम् 'अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे' (४.१.७८/११९८) इति ष्यङ, ततश्चापि विहिते षष्ठीसमासः, 'सम्प्रसारणस्य' (६.३.१३९/१००४) इति दीर्घत्वम् । ष्यङः इति किम् ? इभ्यापुत्रः । क्षत्रियापुत्रः । पुत्रपत्योः इति किम् ? कारीषगन्ध्याकुलम् ।[24] कौमुदगन्ध्याकुलम् । तत्पुरुषे इति किम् ? कारीषगन्ध्या पतिरस्य ग्रामस्य कारीषगन्ध्यापतिः [25]अयं ग्रामः ।

---

1. इति नास्ति फ. 2. इत्यस्य फ. 3. परस्मैपदित्वं क. 4. अद्वित्वं फ. 5. च इत्यधिकम् फ. 6. निपात्यते फ. 7. मृडय मुद्रितः पाठः, मृड ड. 8. एतद्वाक्यं नास्ति फ. 9. द्वित्वं नास्ति क. 10. अपि नास्ति फ. 11. आगम° फ. 12. इति आदेशमेव विदध्यात् इत्यधिकम् फ. 13. पदापदः फ. 14. पटम् 15. श्वा ड. 16. सिद्धं नास्ति फ. 17. घत्वं फ. 18. दीर्घः नास्ति फ. 19. प्रत्यये इत्यधिकम् फ. 20. पाटपटः ब, पटूपटः क. 21. कारिषगन्ध्याः पुत्रः इत्यधिकम् फ. 22. ततः फ. 23. गन्धस्य नास्ति फ. 24. उदाहरणमिदं नास्ति फ. 25. अयं नास्ति फ.